# रामकृष्णमिशन्विद्यामन्दिरम्

संस्कृतस्नातकोत्तरकक्षाप्रवेशपात्रतापरीक्षा-२०१६

पूर्णाङ्काः ४० समयः सार्धघण्टात्मकः

## उत्तरं सर्वं संस्कृतभाषया देवनागर्यैव लेख्यम्

क. यं कमप्येकं विषयमवलम्ब्य न्यूनतया दशभिर्वाक्यैः लघुबन्धो विरचनीयः। १०

क) अन्तर्जालम् । ख) जलं जीवनम् । ग) विश्वयोगदिवसः ।

ख. अधोलिखितानुच्छेदस्य संस्कृतभाषयानुवादः कर्तव्यः। १०

Be not afraid of anything. You will do marvelous work. The moment you fear, you are nobody. It is fear that is the great cause of misery in the world. It is fear that is the greatest of all superstitions. It is fear that is the cause of our woes, and it is fearlessness that brings heaven even in a moment. Therefore, “Arise, awake, and stop not till the goal is reached.”

ग. अधोदत्तानां प्रश्नानां संक्षिप्तमुत्तरं लेख्यम् ।

१. ‘स्वकर्मसूत्रैर्ग्रथितो हि लोकः’ – पादेऽत्र गणविभागपुरःसरं सलक्षणं छन्दो निर्णेयम् । २

२. ‘तज्जावेतावुभौ गणौ’—इत्यत्र तत्पदेन कस्य परामर्शः? १

३. ‘न बाधतेऽस्य त्रिगणः परस्परम्’ – कस्तावत् त्रिगणः? १

४. ‘देवेभिः’ इति वैदिकप्रयोगः केन पाणिनीयसूत्रेण सङ्गच्छते? १

५. ‘कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥’ – इति श्लोको गीतायाः किंनामके कस्मिन्नध्याये राजते? १

६. ‘नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः॥’
– अत्रोदाहरणे विद्यमानस्यार्थालंकारस्य सलक्षणं नाम लेख्यम्। २

७. देवनागर्या लेख्यम् – *kārṣṇyam* १

८. ‘पर्वतो धूमवान् वह्नेः’ – इत्यत्र कस्तावद्धेतुः? १

९. वाच्यान्तरेण लेख्यम् -- कर्तुरीप्सिततमं कर्म । २

१०. व्युत्पत्तिर्निर्णेया ‘<u>विचिन्तयन्ती</u> यमनन्यमानसा’ इत्यत्र निम्नरेखाङ्कितपदस्य । १

११. सकारणं विभक्तिर्निर्णेया ‘<u>हृत्पिण्डे</u> वानरं जिघांसति’ इत्यत्र निम्नरेखाङ्कितपदस्य । १

१२. सविग्रहं समासनाम लेख्यं ‘श्रु<u>तिविषयगुणा</u> या स्थिता व्याप्य विश्वम्’ इत्यत्र निम्नरेखाङ्कितपदस्य । २

१३. आकाशे साक्षात्सम्बन्धेन विद्यमानस्य जातिद्वयस्य नाम लेख्यम् । १

१४. ‘ततो<u>ऽर्थी</u> लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्’ इत्यत्र निम्नरेखाङ्कितपदस्य कस्तावदर्थः? १

१५. दोषसंशोधनपूर्वकं वाक्यं लेख्यम् – २

भासेन विरोचिते स्बप्नबासबदत्तं नाम नाटकस्य प्रथमाङ्के ब्रम्भचारीबृत्तान्तं प्राप्यते ।